SUBJECT- SANSKRIT(H)

COURSE CODE-AHSNS202C-4

COURSE TITLE- CLASSICAL SANSKRIT LITERATUE(DRAMA)

COURSE TOPIC- SWAPNAVĀSAVADATTAM

**दुःखं त्यक्तुं बद्धमूलोऽनुरागः स्मृत्वा याति दुःखं नवत्वम्।**

**यात्रा त्वेषा यद्विमुच्येह वाष्पं प्राप्तानृण्या याति बुद्धिः प्रसादम्।।4/6।।**

प्रथितयशसः महाकविभासस्य 'स्वप्नवासवदत्तम्' इति नाटके चतुर्थोऽङ्के श्लोकः अयमुपलभ्यते। विदुषकेन स्मारितः राजा उदयनः तमेव अकथयत् यत्, राज्ञः वासवदत्ताविरहजन्यां दशाम् अजान्नेव स "**धारयतु धारयतु भवान्**" इति कथयित्वा तं प्रवोधयितुमचेष्टत। परं तु वासवदत्तां प्रति बद्धमूलम् अनुरागं राजा विस्मर्तुं न शशाक इत्यत आह- दुःखमिति।

बद्धमूलः बद्धं मूलं येन स गम्भीरः प्रगाढः अनुरागः वासवदत्तविषयः, तत् प्रेम त्यक्तुं विस्मर्तुं क्लेशकरम्। स्मृत्वा स्मृत्वा पुनः पुनः वासवदत्तां संस्मृत्य मम दुःखं नवत्वं याति नूतनं भवति। एषा तु यात्रा लोकाचारमर्यादा यत् बुद्धिः मनः इहलोके वाष्पम् अश्रु विमुच्य विसृज्य प्राप्तानृण्या प्राप्तम् अनृण्यं  यया सा,  ऋणस्य अभावं प्राप्य, ऋणात् मुक्तिं लब्धा इत्यर्थः, प्रसादं प्रसन्नतां याति गच्छति, मनः प्रसन्नं भवति। अश्रुपातेन निर्यातितं प्रेम तथैव चित्तं

निर्मलं किञ्चिद् उच्छसितञ्च भवति। तथाचोक्तों भवभुतिना उत्तररामचरिते, -" **शोकक्षोभे च हृदयं प्रलापैरेव धार्यते**" इति। शालिनी वृत्तमत्र उपलभ्यते।